

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## चतुर्थकाण्डे सप्तमः प्रश्नः

### वसोर्धारादिशिष्टसंस्काराभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

अग्नाविष्णू सजोषसा। अग्नाविष्णू इत्यग्नी—विष्णू। सजोषसेमाः। सजोषसेति स—जोषसा। इमा वर्द्धन्तु। वर्द्धन्तु वाम्। वाङ्गिरः। गिर इति गिरः॥ द्युम्नैर् वाजेभिः। वाजेभिरा। आ गतम्। गतमिति गतम्॥ वाजश्च। च मे। मे प्रसवः। प्रसवश्च। प्रसव इति प्र—सवः। च मे। मे प्रयतिः। प्रयतिश्च। प्रयतिरिति प्र—यतिः। च मे। मे प्रसितिः। प्रसितिश्च। प्रसितिरिति प्र—सितिः। च मे। मे धीतिः। धीतिश्च। च मे। मे क्रतुः। क्रतुश्च। च मे। मे स्वरः। स्वरश्च। च मे। मे श्लोकः। श्लोकश्च। च मे। मे श्रावः। श्रावश्च। च मे। मे श्रुतिः। श्रुतिश्च। च मे। मे ज्योतिः। ज्योतिश्च। च मे। मे सुवः। सुवश्च। च मे। मे प्राणः। प्राणश्च। प्राण इति प्र—अनः। च मे। मेऽपानः। अपानश्च। अपान इत्यप—अनः। ॥ [१] ॥ च मे। म व्यानः। व्यानश्च। व्यान इति वि—अनः। च मे। मेऽसुः। असुश्च। च मे। मे चित्तम्। चित्तम् च। च मे। म आधीतम्। आधीतम् च। आधीतमित्या—धीतम्। च मे। मे वाक्। वाक् च। च मे। मे मनः। मनश्च। च मे। मे चख्षुः। चख्षुश्च। च मे। मे श्रोत्रम्। श्रोत्रम् च। च मे। मे दख्षः। दख्षश्च। च मे। मे बलम्। बलम् च। च मे। म ओजः। ओजश्च। च मे। मे सहः। सहश्च। च मे। म आयुः। आयुश्च। च मे। मे जरा। जरा च। च मे। म आत्मा। आत्मा च। च मे। मे तनूः। तनूश्च। च मे। मे शर्म। शर्म च। च मे। मे वर्म। वर्म च। च मे। मेऽङ्गानि। अङ्गानि च। च मे। मेऽस्थानि।

अस्थानि च। च मे। मे परूꣳषि। परूꣳषि च। च मे। मे शरीराणि। शरीराणि च। च मे। म इति मे॥ ॥ [२] ॥

(अपान स्तनूश्च मे ऽष्टादश च) ॥ १ ॥

ज्यैष्ठ्यम् च। च मे। म आधिपत्यम्। आधिपत्यम् च। आधिपत्यमित्याधि—पत्यम्। च मे। मे मन्युः। मन्युश्च। च मे। मे भामः। भामश्च। च मे। मेऽमः। अमश्च। च मे। मेऽम्भः। अम्भश्च। च मे। मे जेमा। जेमा च। च मे। मे महिमा। महिमा च। च मे। मे वरिमा। वरिमा च। च मे। मे प्रथिमा। प्रथिमा च। च मे। मे वर्ष्मा। वर्ष्मा च। च मे। मे द्राघुया। द्राघुया च। च मे। मे वृद्धम्। वृद्धम् च। च मे। मे वृद्धिः। वृद्धिश्च। च मे। मे सत्यम्। सत्यम् च। च मे। मे श्रद्धा। श्रद्धा च। श्रद्धेति श्रत्—धा। च मे। मे जगत्। जगच्च् च। च मे। ॥ [३] ॥ मे धनम्। धनम् च। च मे। मे वशः। वशश्च। च मे। मे त्विषिः। त्विषिश्च। च मे। मे क्रीडा। क्रीडा च। च मे। मे मोदः। मोदश्च। च मे। मे जातम्। जातम् च। च मे। मे जनिष्यमाणम्। जनिष्यमाणम् च। च मे। मे सूक्तम्। सूक्तम् च। सूक्तमिति सु—उक्तम्। च मे। मे सुकृतम्। सुकृतम् च। सुकृतमिति सु—कृतम्। च मे। म वित्तम्। वित्तम् च। च मे। मे वेद्यम्। वेद्यम् च। च मे। मे भूतम्। भूतम् च। च मे। मे भविष्यत्। भविष्यच्च् च। च मे। मे सुगम्। सुगम् च। सुगमिति सु—गम्। च मे। मे सुपथम्। सुपथम् च। सुपथमिति सु—पथम्। च मे। म ऋद्धम्। ऋद्धम् च। च मे। म ऋद्धिः। ऋद्धिश्च। च मे। मे क्लृप्तम्। क्लृप्तम् च। च मे। मे क्लृप्तिः। क्लृप्तिश्च। च मे। मे मतिः। मतिश्च। च मे। मे सुमतिः। सुमतिश्च। सुमतिरिति सु—मतिः। च मे। म इति मे॥ ॥ [४] ॥

(जगच्च र्द्धि श्चतुर्दश च) ॥ २ ॥

शम् च। च मे। मे मयः। मयश्च। च मे। मे प्रियम्। प्रियम् च। च मे। मेऽनुकामः। अनुकामश्च। अनुकाम इत्यनु—कामः। च मे। मे कामः। कामश्च। च मे। मे सौमनसः।

सौमनसश्च। च मे। मे भद्रम्। भद्रम् च। च मे। मे श्रेयः। श्रेयश्च। च मे। मे वस्यः। वस्यश्च। च मे। मे यशः। यशश्च। च मे। मे भगः। भगश्च। च मे। मे द्रविणम्। द्रविणम् च। च मे। मे यन्ता। यन्ता च। च मे। मे धर्त्ता। धर्त्ता च। च मे। मे क्षेमः। क्षेमश्च। च मे। मे धृतिः। धृतिश्च। च मे। मे विश्वम्। विश्वम् च। च मे। ॥ [५] ॥ मे महः। महश्च। च मे। मे सँवित्। सँविच् च। सँविदिति सम्—वित्। च मे। मे ज्ञात्रम्। ज्ञात्रम् च। च मे। मे सूः। सूश्च। च मे। मे प्रसूः। प्रसूश्च। प्रसूरिति प्र—सूः। च मे। मे सीरम्। सीरम् च। च मे। मे लयः। लयश्च। च मे। म ऋतम्। ऋतम् च। च मे। मेऽमृतम्। अमृतम् च। च मे। मेऽयक्ष्मम्। अयक्ष्मम् च। च मे। मेऽनामयत्। अनामयच्च। च मे। मे जीवातुः। जीवातुश्च। च मे। मे दीर्घायुत्वम्। दीर्घायुत्वम् च। दीर्घायुत्वमिति दीर्घायु—त्वम्। च मे। मेऽनमित्रम्। अनमित्रम् च। च मे। मेऽभयम्। अभयम् च। च मे। मे सुगम्। सुगम् च। सुगमिति सु—गम्। च मे। मे शयनम्। शयनम् च। च मे। मे सूषा। सूषा च। सूषेति सु—उषा। च मे। मे सुदिनम्। सुदिनम् च। सुदिनमिति सु—दिनम्। च मे। म इति मे॥ ॥ [६] ॥

(विश्वम् च शयन मष्टौ च) ॥ ३ ॥

---

ऊर्क् च। च मे। मे सूनृता। सूनृता च। च मे। मे पयः। पयश्च। च मे। मे रसः। रसश्च। च मे। मे घृतम्। घृतम् च। च मे। मे मधु। मधु च। च मे। मे सग्धिः। सग्धिश्च। च मे। मे सपीतिः। सपीतिश्च। सपीतिरिति स—पीतिः। च मे। मे कृषिः। कृषिश्च। च मे। मे वृष्टिः। वृष्टिश्च। च मे। मे जैत्रम्। जैत्रम् च। च मे। म औद्भिद्यम्। औद्भिद्यम् च। औद्भिद्य-मित्यौत्—भिद्यम्। च मे। मे रयिः। रयिश्च। च मे। मे रायः। रायश्च। च मे। मे पुष्टम्। पुष्टम् च। च मे। मे पुष्टिः। पुष्टिश्च। च मे। मे विभु। विभु च। विभ्विति वि—भु। च मे। ॥ [७] ॥ मे प्रभु। प्रभु च। प्रभ्विति प्र—भु। च मे। मे बहु। बहु च। च मे। मे भूयः। भूयश्च। च मे। मे पूर्णम्। पूर्णम् च। च मे। मे पूर्णतरम्। पूर्णतरम् च। पूर्णतरमिति पूर्ण—तरम्। च मे। मेऽक्षितिः। अक्षितिश्च। च मे। मे कूयवाः। कूयवाश्च। च मे। मेऽन्नम्। अन्नम् च। च मे। मेऽक्षुत्। अक्षुच् च। च मे। मे व्रीहयः। व्रीहयश्च। च मे। मे यवाः। यवाश्च। च मे।

मे माषाः। माषाश्च। च मे। मे तिलाः। तिलाश्च। च मे। मे मुद्गाः। मुद्गाश्च। च मे। मे खल्वाः। खल्वाश्च। च मे। मे गोधूमाः। गोधूमाश्च। च मे। मे मसुराः। मसुराश्च। च मे। मे प्रियङ्गवः। प्रियङ्गवश्च। च मे। मेऽणवः। अणवश्च। च मे। मे श्यामाकाः। श्यामाकाश्च। च मे। मे नीवाराः। नीवाराश्च। च मे। म इति मे॥ ॥ [८] ॥

(विभु च मसुरा श्चतुर्दश च) ॥ ४ ॥

अश्मा च। च मे। मे मृत्तिका। मृत्तिका च। च मे। मे गिरयः। गिरयश्च। च मे। मे पर्वताः। पर्वताश्च। च मे। मे सिकताः। सिकताश्च। च मे। मे वनस्पतयः। वनस्पतयश्च। च मे। मे हिरण्यम्। हिरण्यम् च। च मे। मेऽयः। अयश्च। च मे। मे सीसम्। सीसम् च। च मे। मे त्रपु। त्रपुश्च। च मे। मे श्यामम्। श्यामम् च। च मे। मे लोहम्। लोहम् च। च मे। मेऽग्निः। अग्निश्च। च मे। म आपः। आपश्च। च मे। मे वीरुधः। वीरुधश्च। च मे। म ओषधयः। ओषधयश्च। च मे। मे कृष्टपच्यम्। कृष्टपच्यम् च। कृष्टपच्यमिति कृष्ट—पच्यम्। च मे। ॥ [९] ॥ मेऽकृष्टपच्यम्। अकृष्टपच्यम् च। अकृष्टपच्यमित्यकृष्ट—पच्यम्। च मे। मे ग्राम्याः। ग्राम्याश्च। च मे। मे पशवः। पशव आरण्याः। आरण्याश्च। च यज्ञेन। यज्ञेन कल्पन्ताम्। कल्पन्ताँवित्तम्। वित्तम् च। च मे। मे वित्तिः। वित्तिश्च। च मे। मे भूतम्। भूतम् च। च मे। मे भूतिः। भूतिश्च। च मे। मे वसु। वसु च। च मे। मे वसतिः। वसतिश्च। च मे। मे कर्म। कर्म च। च मे। मे शक्तिः। शक्तिश्च। च मे। मेऽर्थः। अर्थश्च। च मे। म एमः। एमश्च। च मे। म इतिः। इतिश्च। च मे। मे गतिः। गतिश्च। च मे। म इति मे॥ ॥ [१०] ॥

(कृष्टपच्यम् चा ऽष्टाचत्वारिंशच्च) ॥ ५ ॥

अग्निश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे सोमः। सोमश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे सविता। सविता च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे सरस्वती। सरस्वती च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे पूषा। पूषा च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे

बृहस्पतिः। बृहस्पतिश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे मित्रः। मित्रश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे वरुणः। वरुणश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे त्वष्टा। त्वष्टा च। च मे। ॥ [११] ॥ म इन्द्रः। इन्द्रश्च। च मे। मे धाता। धाता च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे विष्णुः। विष्णुश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मेऽश्विनौ। अश्विनौ च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे मरुतः। मरुतश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे विश्वे। विश्वे च। च मे। मे देवाः। देवा इन्द्रः। इन्द्रश्च। च मे। मे पृथिवी। पृथिवी च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मेऽन्तरिख्षम्। अन्तरिख्षम् च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे द्यौः। द्यौश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे दिशः। दिशश्च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे मूर्द्धा। मूर्द्धा च। च मे। म इन्द्रः। इन्द्रश्च। च मे। मे प्रजापतिः। प्रजापतिश्च। प्रजापतिरिति प्रजा—पतिः। च मे। म इन्द्रः। इन्द्रश्च। च मे। म इति मे॥ ॥ [१२] ॥

(त्वष्टा च द्यौश्च म एकविंशतिश्च) ॥ ६ ॥

अंशुश्च। च मे। मे रश्मिः। रश्मिश्च। च मे। मेऽदाभ्यः। अदाभ्यश्च। च मे। मेऽधिपतिः। अधिपतिश्च। अधिपतिरित्यधि—पतिः। च मे। म उपांशुः। उपांशुश्च। उपांशुरित्युप—अंशुः। च मे। मेऽन्तर्यामः। अन्तर्यामश्च। अन्तर्याम इत्यन्तः—यामः। च मे। म ऐन्द्र-वायवः। ऐन्द्रवायवश्च। ऐन्द्रवायव इत्यैन्द्र—वायवः। च मे। मे मैत्रावरुणः। मैत्रावरुणश्च। मैत्रावरुण इति मैत्रा—वरुणः। च मे। म आश्विनः। आश्विनश्च। च मे। मे प्रतिप्रस्थानः। प्रति-प्रस्थानश्च। प्रतिप्रस्थान इति प्रति—प्रस्थानः। च मे। मे शुक्रः। शुक्रश्च। च मे। मे मन्थी। मन्थी च। च मे। म आग्रयणः। आग्रयणश्च। च मे। मे वैश्वदेवः। वैश्वदेवश्च। वैश्वदेव इति वैश्व—देवः। च मे। मे ध्रुवः। ध्रुवश्च। च मे। मे वैश्वानरः। वैश्वानरश्च। च मे। म ऋतुग्रहाः। ऋतुग्र-हाश्च। ऋतुग्रहा इत्यृतु—ग्रहाः। च मे। ॥ [१३] ॥ मेऽतिग्राह्याः। अतिग्राह्याश्च। अतिग्राह्या इत्यति—ग्राह्याः। च मे। म ऐन्द्राग्नः। ऐन्द्राग्नश्च। ऐन्द्राग्न इत्यैन्द्र—अग्नः। च मे। मे वैश्व-देवः। वैश्वदेवश्च। वैश्वदेव इति वैश्व—देवः। च मे। मे मरुत्वतीयाः। मरुत्वतीयाश्च। च मे। मे माहेन्द्रः। माहेन्द्रश्च। माहेन्द्र इति माहा—इन्द्रः। च मे। म आदित्यः। आदित्यश्च। च मे। मे

सावित्रः। सावित्रश्च। च मे। मे सारस्वतः। सारस्वतश्च। च मे। मे पौष्णः। पौष्णश्च। च मे। मे पात्नीवतः। पात्नीवतश्च। पात्नीवत इति पात्नी—वतः। च मे। मे हारियोजनः। हारियोजनश्च। हारियोजन इति हारि—योजनः। च मे। म इति मे॥ ॥ [१४] ॥

(ऋतुग्रहाश्च चतुस्त्रिꣳशच्च) ॥ ७ ॥

---

इद्ध्मश्च। च मे। मे बर्हिः। बर्हिश्च। च मे। मे वेदिः। वेदिश्च। च मे। मे धिष्णियाः। धिष्णियाश्च। च मे। मे स्रुचः। स्रुचश्च। च मे। मे चमसाः। चमसाश्च। च मे। मे ग्रावाणः। ग्रावाणश्च। च मे। मे स्वरवः। स्वरवश्च। च मे। म उपरवाः। उपरवाश्च। उपरवा इत्युप—रवाः। च मे। मेऽधिषवणे। अधिषवणे च। अधिषवणे इत्यधि—सवने। च मे। मे द्रोणकलशः। द्रोणकलशश्च। द्रोणकलश इति द्रोण—कलशः। च मे। मे वायव्यानि। वायव्यानि च। च मे। मे पूतभृत्। पूतभृच्च। पूतभृदिति पूत—भृत्। च मे। म आधवनीयः। आधवनीयश्च। आधवनीय इत्या—धवनीयः। च मे। म आग्नीद्ध्रम्। आग्नीद्ध्रम् च। आग्नीद्ध्रमित्याग्नि—इद्ध्रम्। च मे। मे हविर्द्धानम्। हविर्द्धानम् च। हविर्द्धानमिति हविः—धानम्। च मे। मे गृहाः। गृहाश्च। च मे। मे सदः। सदश्च। च मे। मे पुरोडाशाः। पुरोडाशाश्च। च मे। मे पचताः। पचताश्च। च मे। मेऽवभृथः। अवभृथश्च। अवभृथ इत्यव—भृथः। च मे। मे स्वगाकारः। स्वगाकारश्च। स्वगाकार इति स्वगा—कारः। च मे। म इति मे॥ ॥ [१५] ॥

(गृहाश्च षोडश च) ॥ ८ ॥

---

अग्निश्च। च मे। मे घर्मः। घर्मश्च। च मे। मेऽर्कः। अर्कश्च। च मे। मे सूर्यः। सूर्यश्च। च मे। मे प्राणः। प्राणश्च। प्राण इति प्र—अनः। च मे। मेऽश्वमेधः। अश्वमेधश्च। अश्वमेध इत्यश्व—मेधः। च मे। मे पृथिवी। पृथिवी च। च मे। मेऽदितिः। अदितिश्च। च मे। मे दितिः। दितिश्च। च मे। मे द्यौः। द्यौश्च। च मे। मे शक्करीः। शक्करीरङ्गुलयः। अङ्गुलयो दिशः। दिशश्च। च मे। मे यज्ञेन। यज्ञेन कल्पन्ताम्। कल्पन्तामृक्। ऋक् च। च मे। मे साम।

साम॑ च। च॒ मे॒। मे॒ स्तोम॑ः। स्तोम॑श्च। च॒ मे॒। मे॒ यजु॑ः। यजु॑श्च। च॒ मे॒। मे॒ दी॒क्षा। दी॒क्षा च॑। च॒ मे॒। मे॒ तप॑ः। तप॑श्च। च॒ मे॒। म॒ ऋ॒तुः। ऋ॒तुश्च॑। च॒ मे॒। मे॒ व्र॒तम्। व्र॒तम् च॑। च॒ मे॒। मे॒ऽहो॒रा॒त्रयो॑ः। अ॒हो॒रा॒त्रयो॑र् वृ॒ष्ट्या। अ॒हो॒रा॒त्रयो॒रित्य॑हः—रा॒त्रयो॑ः। वृ॒ष्ट्या बृ॑हद्रथन्त॒रे। बृ॒हद्र॒-थ॒न्त॒रे च॑। बृ॒हद्र॒थ॒न्त॒रे इति॑ बृहत्—र॒थ॒न्त॒रे। च॒ मे॒। मे॒ य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पेताम्। क॒ल्पे॒ता॒मिति॑ कल्पेताम्॥ ॥ [१६] ॥

(दी॒क्षाऽ ष्टाद॑श च) ॥ ९ ॥

---

गर्भा॑श्च। च॒ मे॒। मे॒ व॒थ्साः। व॒थ्साश्च॑। च॒ मे॒। मे॒ त्र्यवि॑ः। त्र्यवि॑श्च। त्र्यवि॒रिति॑ त्रि—अवि॑ः। च॒ मे॒। मे॒ त्र्य॒वी। त्र्य॒वी च॑। त्र्य॒वीति॑ त्रि—अ॒वी। च॒ मे॒। मे॒ दि॒त्य॒वाट्। दि॒त्य॒वाट् च॑। दि॒त्य॒वा॑डिति॑ दित्य—वाट्। च॒ मे॒। मे॒ दि॒त्यौ॒ही। दि॒त्यौ॒ही च॑। च॒ मे॒। मे॒ पञ्चा॑विः। पञ्चा॑विश्च। पञ्चा॑वि॒रिति॒ पञ्च॑—अवि॑ः। च॒ मे॒। मे॒ प॒ञ्चा॒वी। प॒ञ्चा॒वी च॑। प॒ञ्चा॒वीति॑ पञ्च—अ॒वी। च॒ मे॒। मे॒ त्रि॒व॒थ्सः। त्रि॒व॒थ्सश्च॑। त्रि॒व॒थ्स इति॑ त्रि—व॒थ्सः। च॒ मे॒। मे॒ त्रि॒व॒थ्सा। त्रि॒व॒थ्सा च॑। त्रि॒व॒थ्सेति॑ त्रि—व॒थ्सा। च॒ मे॒। मे॒ तु॒र्य॒वाट्। तु॒र्य॒वाट् च॑। तु॒र्य॒वा॑डिति॑ तुर्य—वाट्। च॒ मे॒। मे॒ तु॒र्यौ॒ही। तु॒र्यौ॒ही च॑। च॒ मे॒। मे॒ प॒ष्ठ॒वात्। प॒ष्ठ॒वाच् च॑। प॒ष्ठ॒वा॑दिति॑ पष्ठ—वात्। च॒ मे॒। मे॒ प॒ष्ठौ॒ही। प॒ष्ठौ॒ही च॑। च॒ मे॒। म॒ उ॒क्षा। उ॒क्षा च॑। च॒ मे॒। मे॒ व॒शा। व॒शा च॑। च॒ मे॒। म॒ ऋ॒ष॒भः। ऋ॒ष॒भश्च॑। च॒ मे॒। ॥ [१७] ॥ मे॒ वे॒हत्। वे॒हच् च॑। च॒ मे॒। मे॒ऽन॒ड्वान्। अ॒न॒ड्वान् च॑। च॒ मे॒। मे॒ धे॒नुः। धे॒नुश्च॑। च॒ मे॒। म॒ आयु॑ः। आयु॑र् य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒म् प्रा॒णः। प्रा॒णो य॒ज्ञेन॑। प्रा॒ण इति॑ प्र—अ॒नः। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒म॒पा॒नः। अ॒पा॒नो य॒ज्ञेन॑। अ॒पा॒न इत्य॑प—अ॒नः। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒वँ॒व्या॒नः। व्या॒नो य॒ज्ञेन॑। व्या॒न इति॑ वि—अ॒नः। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒म् चक्षु॑ः। चक्षु॑र् य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒ꣳ श्रोत्र॑म्। श्रोत्र॑य्ँ य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒म् मन॑ः। मनो॑ य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒वँ॒वाक्। वाग् य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒मा॒त्मा। आ॒त्मा य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒य्ँ य॒ज्ञः। य॒ज्ञो य॒ज्ञेन॑। य॒ज्ञेन॑ कल्पताम्। क॒ल्प॒ता॒मिति॑ कल्पताम्॥ ॥ [१८] ॥

(ऋ॒ष॒भश्च॑ चत्वारि॒ꣳ॒शच्च॑) ॥ १० ॥

एका च। च मे। मे तिस्रः। तिस्रश्च। च मे। मे पञ्च। पञ्च च। च मे। मे सप्त। सप्त च। च मे। मे नव। नव च। च मे। म एकादश। एकादश च। च मे। मे त्रयोदश। त्रयोदश च। त्रयोदशेति त्रयः—दश। च मे। मे पञ्चदश। पञ्चदश च। पञ्चदशेति पञ्च—दश। च मे। मे सप्तदश। सप्तदश च। सप्तदशेति सप्त—दश। च मे। मे नवदश। नवदश च। नवदशेति नव—दश। च मे। म एकविंशतिः। एकविंशतिश्च। एकविंशतिरित्येक—विंशतिः। च मे। मे त्रयोविंशतिः। त्रयोविंशतिश्च। त्रयोविंशतिरिति त्रयः—विंशतिः। च मे। मे पञ्चविंशतिः। पञ्चविंशतिश्च। पञ्चविंशतिरिति पञ्च—विंशतिः। च मे। मे सप्तविंशतिः। सप्तविंशतिश्च। सप्तविंशतिरिति सप्त—विंशतिः। च मे। मे नवविंशतिः। नवविंशतिश्च। नवविंशतिरिति नव—विंशतिः। च मे। म एकत्रिंशत्। एकत्रिंशच्च च। एकत्रिंशदित्येक—त्रिंशत्। च मे। मे त्रयस्त्रिंशत्। त्रयस्त्रिंशच्च च। त्रयस्त्रिंशदिति त्रयः—त्रिंशत्। च मे। ॥ [१९] ॥

मे चतस्रः। चतस्रश्च। च मे। मेऽष्टौ। अष्टौ च। च मे। मे द्वादश। द्वादश च। च मे। मे षोडश। षोडश च। च मे। मे विंशतिः। विंशतिश्च। च मे। मे चतुर्विंशतिः। चतुर्विंशतिश्च। चतुर्विंशतिरिति चतुः—विंशतिः। च मे। मेऽष्टाविंशतिः। अष्टाविंशतिश्च। अष्टाविंशतिरित्यष्टा—विंशतिः। च मे। मे द्वात्रिंशत्। द्वात्रिंशच्च च। च मे। मे षट्त्रिंशत्। षट्त्रिंशच्च। षट्त्रिंशदिति षट्—त्रिंशत्। च मे। मे चत्वारिंशत्। चत्वारिंशच्च च। च मे। मे चतुश्चत्वारिंशत्। चतुश्चत्वारिंशच्च च। चतुश्चत्वारिंशदिति चतुः—चत्वारिंशत्। च मे। मेऽष्टाचत्वारिंशत्। अष्टाचत्वारिंशच्च च। अष्टाचत्वारिंशदित्यष्टा—चत्वारिंशत्। च मे। मे वाजः। वाजश्च। च प्रसवः। प्रसवश्च। प्रसव इति प्र—सवः। चापिजः। अपिजश्च। अपिज इत्यपि—जः। च क्रतुः। क्रतुश्च। च सुवः। सुवश्च। च मूर्द्धा। मूर्द्धा च। च व्यश्नियः। व्यश्नियश्च। व्यश्निय इति वि—अश्नियः। चान्त्यायनः। आन्त्यायनश्च। चान्त्यः। अन्त्यश्च। च भौवनः। भौवनश्च। च भुवनः। भुवनश्च। चाधिपतिः। अधिपतिश्च। अधिपतिरित्यधि—पतिः। चेति च॥ ॥ [२०] ॥

(त्रयस्त्रिंश्च व्यश्निय एकादश च) ॥ ११ ॥

वाजो नः। नः सप्त। सप्त प्रदिशः। प्रदिशश्चतस्रः। प्रदिश इति प्र—दिशः। चतस्रो वा। वा परावतः। परावत इति परा—वतः॥ वाजो नः। नो विश्वैः। विश्वैर् देवैः। देवैर् धनसातौ। धन-साताविह। धनसाताविति धन—सातौ। इहावतु। अवत्वित्यवतु॥ विश्वे अद्य। अद्य मरुतः। मरुतो विश्वे। विश्व ऊती। ऊती विश्वे। विश्वे भवन्तु। भवन्त्वग्नयः। अग्नयः समिद्धाः। समिद्धा इति सम्—इद्धाः॥ विश्वे नः। नो देवाः। देवा अवसा। अवसा। आ गमन्तु। गमन्तु विश्वम्। विश्वमस्तु। अस्तु द्रविणम्। द्रविणँव्वाजः। वाजो अस्मे। अस्मे इत्यस्मे॥ वाजस्य प्रसवम्। प्रसवम् देवाः। प्रसवमिति प्र—सवम्। देवा रथैः। रथैर् यात। याता हिरण्ययैः। हिरण्ययैरिति हिरण्ययैः॥ अग्निरिन्द्रः। इन्द्रो बृहस्पतिः। बृहस्पतिर् मरुतः। मरुतः सोमपीतये। सोमपीतय इति सोम—पीतये॥ वाजेवाजेऽवत। वाजेवाज इति वाजे—वाजे। अवत वाजिनः। वाजिनो नः। नो धनेषु। धनेषु विप्राः। ॥ [२१] ॥ विप्रा अमृताः। अमृता ऋतज्ञाः। ऋतज्ञा इत्यृत—ज्ञाः॥ अस्य मद्ध्वः। मद्ध्वः पिबत। पिबत मादयद्ध्वम्। मादयद्ध्वम् तृप्ताः। तृप्ता यात। यात पथिभिः। पथिभिर् देवयानैः। पथिभिरिति पथि—भिः। देवयानैरिति देव—यानैः। वाजः पुरस्तात्। पुरस्तादुत। उत मद्ध्यतः। मद्ध्यतो नः। नो वाजः। वाजो देवान्। देवाꣳ ऋतुभिः। ऋतुभिः कल्पयाति। ऋतुभिरित्यृतु—भिः। कल्पयातीति कल्पयाति॥ वाजस्य हि। हि प्रसवः। प्रसवो नन्नमीति। प्रसव इति प्र—सवः। नन्नमीति विश्वाः। विश्वा आशाः। आशा वाज-पतिः। वाजपतिर् भवेयम्। वाजपतिरिति वाज—पतिः। भवेयमिति भवेयम्॥ पयः पृथिव्याम्। पृथिव्याम् पयः। पय ओषधीषु। ओषधीषु पयः। पयो दिवि। दिव्यन्तरिक्षे। अन्तरिक्षे पयः। पयो धाम्। धामिति धाम्॥ पयस्वतीः प्रदिशः। प्रदिशः सन्तु। प्रदिश इति प्र—दिशः। सन्तु मह्यम्। मह्यमिति मह्यम्॥ सम् मा। मा सृजामि। सृजामि पयसा। पयसा घृतेन। घृतेन सम्। सम् मा। मा सृजामि। सृजाम्यपः। अप ओषधीभिः। ॥ [२२] ॥ ओषधीभिरित्योषधि—भिः॥ सोऽहम्। अहँव्वाजम्। वाजꣳ सनेयम्। सनेयमग्ने। अग्न इत्यग्ने॥ नक्तोषासा समनसा। समनसा विरूपे। समनसेति स—मनसा। विरूपे धापयेते। विरूपे इति वि—रूपे। धापयेते शिशुम्। धापयेते इति धापयेते। शिशुमेकम्। एकꣳ समीची। समीची इति समीची॥ द्यावा

ख्षाम। ख्षामा रुक्मः। रुक्मो अन्तः। अन्तर् वि। वि भाति। भाति देवाः। देवा अग्निम्। अग्निम् धारयन्न्। धारयन् द्रविणोदाः। द्रविणोदा इति द्रविणः—दाः॥ समुद्रोऽसि। असि नभस्वान्। नभस्वानार्द्रदानुः। आर्द्रदानुः शम्भूः। आर्द्रदानुरित्यार्द्र—दानुः। शम्भूर् मयोभूः। शम्भूरिति शम्—भूः। मयोभूरभि। मयोभूरिति मयः—भूः। अभि मा। मा वाहि। वाहि स्वाहा। स्वाहा मारुतः। मारुतोऽसि। असि मरुताम्। मरुताम् गणः। गणः शम्भूः। शम्भूर् मयोभूः। शम्भूरिति शम्—भूः। मयोभूरभि। मयोभूरिति मयः—भूः। अभि मा। मा वाहि। वाहि स्वाहा। स्वाहाऽवस्युः। अवस्युरसि। असि दुवस्वान्। दुवस्वाञ्छम्भूः। शम्भूर् मयोभूः। शम्भूरिति शम्—भूः। मयोभूरभि। मयोभूरिति मयः—भूः। अभि मा। मा वाहि। वाहि स्वाहा। स्वाहेति स्वाहा॥ ॥ [२३] ॥

(धने ष्वपो दुवस्वाञ्छम्भूर्मयोभूरभि मा द्वे च) ॥ १२ ॥

---

अग्निय्युँनज्मि। युनज्मि शवसा। शवसा घृतेन। घृतेन दिव्यम्। दिव्यꣳ सुपर्णम्। सुपर्णव्ँवयसा। सुपर्णमिति सु—पर्णम्। वयसा बृहन्तम्। बृहन्तमिति बृहन्तम्॥ तेन वयम्। वयम् पतेम। पतेम ब्रद्ध्नस्य। ब्रद्ध्नस्य विष्टपम्। विष्टपꣳ सुवः। सुवो रुहाणाः। रुहाणा अधि। अधि नाके। नाक उत्तमे। उत्तम इत्युत्—तमे॥ इमौ ते। ते पख्षौ। पख्षावजरौ। अजरौ पतत्रिणः। पतत्रिणो याभ्याम्। याभ्याꣳ रख्षाꣳसि। रख्षाꣳस्यपहꣳसि। अपहꣳस्यग्ने। अपहꣳसीत्यप—हꣳसि। अग्न इत्यग्ने॥ ताभ्याम् पतेम। पतेम सुकृताम्। सुकृतामु। सुकृतामिति सु—कृताम्। उ लोकम्। लोकय्ँयत्र। यत्रर्षयः। ऋषयः प्रथमजाः। प्रथमजा ये। प्रथमजा इति प्रथम—जाः। ये पुराणाः। पुराणा इति पुराणाः॥ चिदसि। असि समुद्रयोनिः। समुद्रयोनिरिन्दुः। समुद्रयोनिरिति समुद्र—योनिः। इन्दुर् दख्षः। दख्षः श्येनः। श्येन ऋतावा। ऋतावेत्यृत—वा॥ हिरण्यपख्षः शकुनः। हिरण्यपख्ष इति हिरण्य—पख्षः। शकुनो भुरण्युः। भुरण्युर् महान्। महान्थ् सधस्थे। सधस्थे ध्रुवः। सधस्थ इति सध—स्थे। ध्रुव आ। ॥ [२४] ॥ आ निषत्तः। निषत्त इति नि—सत्तः॥ नमस्ते। ते अस्तु। अस्तु मा। मा मा। मा हिꣳसीः। हिꣳसीर् विश्वस्य। विश्वस्य मूर्द्धन्न्। मूर्द्धन्नधि। अधि तिष्ठसि। तिष्ठसि श्रितः। श्रित इति श्रितः॥ समुद्रे

ते। ते हृदयम्। हृदयमन्तः। अन्तरायुः। आयुर् द्यावापृथिवी। द्यावापृथिवी भुवनेषु। द्यावापृथिवी इति द्यावा—पृथिवी। भुवनेष्वर्पिते। अर्पिते इत्यर्पिते॥ उद्नो दत्त। दत्तोदधिम्। उदधिम् भिन्त। उदधिमित्युद—धिम्। भिन्त दिवः। दिवः पर्जन्यात्। पर्जन्यादन्तरिक्षात्। अन्तरिक्षात् पृथिव्याः। पृथिव्यास्ततः। ततो नः। नो वृष्ट्या। वृष्ट्याऽवत। अवतेत्यवत॥ दिवो मूर्द्धा। मूर्द्धाऽसि। असि पृथिव्या। पृथिव्या नाभिः। नाभिरूर्क्। ऊर्गपाम्। अपामोषधीनाम्। ओषधीनामित्योषधीनाम्॥ विश्वायुः शर्म। विश्वायुरिति विश्व—आयुः। शर्म सप्रथाः। सप्रथा नमः। सप्रथा इति स—प्रथाः। नमस्पथे। पथ इति पथे॥ येनर्षयः। ऋषयस्तपसा। तपसा सत्रम्। सत्रमासत। ॥ [२५] ॥ आसतेन्धानाः। इन्धाना अग्निम्। अग्निꣳ सुवः। सुवराभरन्तः। आभरन्त इत्या—भरन्तः॥ तस्मिन्नहम्। अहम् नि। नि दधे। दधे नाके। नाके अग्निम्। अग्निमेतम्। एतय्ँयम्। यमाहुः। आहुर् मनवः। मनवः स्तीर्णबर्हिषम्। स्तीर्णबर्हिषमिति स्तीर्ण—बर्हिषम्॥ तम् पत्नीभिः। पत्नीभिरनु। अनु गच्छेम। गच्छेम देवाः। देवाः पुत्रैः। पुत्रैर् भ्रातृभिः। भ्रातृभिरुत। भ्रातृभिरिति भ्रातृ—भिः। उत वा। वा हिरण्यैः। हिरण्यैरिति हिरण्यैः॥ नाकम् गृह्णानाः। गृह्णानाः सुकृतस्य। सुकृतस्य लोके। सुकृतस्येति सु—कृतस्य। लोके तृतीये। तृतीये पृष्ठे। पृष्ठे अधि। अधि रोचने। रोचने दिवः। दिव इति दिवः॥ आ वाचः। वाचो मद्ध्यम्। मद्ध्यमरुहत्। अरुहद् भुरण्युः। भुरण्युरयम्। अयमग्निः। अग्निः सत्पतिः। सत्पतिश्चेकितानः। सत्पतिरिति सत्—पतिः। चेकितान इति चेकितानः॥ पृष्ठे पृथिव्याः। पृथिव्या निहितः। निहितो दविद्युतत्। निहित इति नि—हितः। दविद्युतदधस्पदम्। अधस्पदम् कृणुते। अधस्पदमित्यधः—पदम्। कृणुते ये। ॥ [२६] ॥ ये पृतन्यवः। पृतन्यव इति पृतन्यवः॥ अयमग्निः। अग्निर् वीरतमः। वीरतमो वयोधाः। वीरतम इति वीर—तमः। वयोधाः सहस्रियः। वयोधा इति वयः—धाः। सहस्रियो दीप्यताम्। दीप्यतामप्रयुच्छन्न्। अप्रयुच्छन्नित्यप्र—युच्छन्न्॥ विभ्राजमानः सरिरस्य। विभ्राजमान इति वि—भ्राजमानः। सरिरस्य मद्ध्ये। मद्ध्य उप। उप प्र। प्र यात। यात दिव्यानि। दिव्यानि धाम। धामेति धाम॥ सम् प्र। प्र च्यवद्ध्वम्। च्यवद्ध्वमनु। अनु सम्। सम् प्र। प्र यात। याताग्ने। अग्ने पथः। पथो देवयानान्। देवयानान् कृणुद्ध्वम्। देवयानानिति देव—यानान्। कृणुद्ध्वमिति

कृणुद्ध्वम्॥ अस्मिन्थ् सधस्थे। सधस्थे अधि। सधस्थ इति सध—स्थे। अद्ध्युत्तरस्मिन्न्। उत्तरस्मिन् विश्वे। उत्तरस्मिन्नित्युत्—तरस्मिन्न्। विश्वे देवाः। देवा यजमानः। यजमानश्च। च सीदत। सीदतेति सीदत॥ येना सहस्रम्। सहस्रव्ँवहसि। वहसि येन। येनाग्ने। अग्ने सर्व-वेदसम्। सर्ववेदसमिति सर्व—वेदसम्। तेनेमम्। इमय्ँयज्ञम्। यज्ञम् नः। नो वह। वह देव-यानः। देवयानो यः। देवयान इति देव—यानः। य उत्तमः। ॥ [२७] ॥ उत्तम इत्युत्—तमः। उद् बुद्ध्यस्व। बुद्ध्यस्वाग्ने। अग्ने प्रति। प्रति जागृहि। जागृह्येनम्। एनमिष्टापूर्ते। इष्टा-पूर्ते सम्। इष्टापूर्ते इतीष्टा—पूर्ते। सꣳ सृजेथाम्। सृजेथामयम्। अयम् च। चेति च॥ पुनः कृण्वन्न्। कृण्वꣳस्त्वा। त्वा पितरम्। पितरय्ँयुवानम्। युवानमन्वाताꣳसीत्। अन्वाताꣳसीत् त्वयि। अन्वाताꣳसीदित्यनु—आताꣳसीत्। त्वयि तन्तुम्। तन्तुमेतम्। एतमित्येतम्॥ अयम् ते। ते योनिः। योनिर्ऋत्वियः। ऋत्वियो यतः। यतो जातः। जातो अरोचथाः। अरोचथा इत्यरोचथाः॥ तम् जानन्न्। जानन्नग्ने। अग्न आ। आ रोह। रोहाथ। अथा नः। नो वर्द्धय। वर्द्धया रयिम्। रयिमिति रयिम्॥ ॥ [२८] ॥

(ध्रुवः सत्रम् कृणुते यः सप्तत्रिꣳशच्च) ॥ १३ ॥

ममाग्ने। अग्ने वर्चः। वर्चो विहवेषु। विहवेष्वस्तु। विहवेष्विति वि—हवेषु। अस्तु वयम्। वयम् त्वा। त्वेन्धानाः। इन्धाना स्तनुवम्। तनुवम् पुषेम। पुषेमेति पुषेम॥ मह्यम् नमन्ताम्। नमन्ताम् प्रदिशः। प्रदिशश्चतस्रः। प्रदिश इति प्र—दिशः। चतस्रस्त्वया। त्वयाऽद्ध्यक्षेण। अद्ध्यक्षेण पृतनाः। अद्ध्यक्षेणेत्यधि—अक्षेण। पृतना जयेम। जयेमेति जयेम॥ मम देवाः। देवा विहवे। विहवे सन्तु। विहव इति वि—हवे। सन्तु सर्वे। सर्व इन्द्रावन्तः। इन्द्रावन्तो मरुतः। इन्द्रावन्त इतीन्द्र—वन्तः। मरुतो विष्णुः। विष्णुरग्निः। अग्निरित्यग्निः॥ ममान्त-रिक्षम्। अन्तरिक्षमुरु। उरु गोपम्। गोपमस्तु। अस्तु मह्यम्। मह्यव्ँवातः। वातः पवताम्। पवताम् कामे। कामे अस्मिन्न्। अस्मिन्नित्यस्मिन्न्॥ मयि देवाः। देवा द्रविणम्। द्रविणमा। आ यजन्ताम्। यजन्ताम् मयि। मय्याशीः। आशीरस्तु। आशीरित्या—शीः। अस्तु मयि। मयि देवहूतिः। देवहूतिरिति देव—हूतिः॥ दैव्या होतारा। होतारा वनिषन्त। वनिषन्त पूर्वे।

॥ [२९] ॥ पूर्वेऽरिष्टाः। अरिष्टाः स्याम। स्याम तनुवा। तनुवा सुवीराः। सुवीरा इति सु—वीराः॥ मह्यँय्यजन्तु। यजन्तु मम। मम यानि। यानि हव्या। हव्याऽऽकूतिः। आकूतिः सत्या। आकूतिरित्या—कूतिः। सत्या मनसः। मनसो मे। मे अस्तु। अस्त्वित्यस्तु॥ एनो मा। मा नि। नि गाम्। गाम् कतमत्। कतमच् चन। चनाहम्। अहव्विश्वे। विश्वे देवासः। देवासो अधि। अधि वोचत। वोचता मे। म इति मे॥ देवीः षडुर्वीः। षडुर्वीरुरु। षडुर्वीरिति षट्—उर्वीः। उरु णः। नः कृणोत। कृणोत विश्वे। विश्वे देवासः। देवास इह। इह वीरयध्वम्। वीरयध्वमिति वीरयध्वम्॥ मा हास्महि। हास्महि प्रजया। प्रजया मा। प्रजयेति प्र—जया। मा तनूभिः। तनूभिर् मा। मा रधाम। रधाम द्विषते। द्विषते सोम। सोम राजन्न्। राजन्निति राजन्न्॥ अग्निर् मन्युम्। मन्युम् प्रतिनुदन्न्। प्रतिनुदन् पुरस्तात्। प्रतिनुदन्निति प्रति—नुदन्न्। पुरस्तादद्ब्धः। ॥ [३०] ॥ अदब्धो गोपाः। गोपाः परि। गोपा इति गो—पाः। परि पाहि। पाहि नः। नस्त्वम्। त्वमिति त्वम्॥ प्रत्यञ्चो यन्तु। यन्तु निगुतः। निगुतः पुनः। निगुत इति नि—गुतः। पुनस्ते। तेऽमा। अमैषाम्। एषाम् चित्तम्। चित्तम् प्रबुधा। प्रबुधा वि। प्रबुधेति प्र—बुधा। वि नेशत्। नेशदिति नेशत्॥ धाता धातृणाम्। धातृणाम् भुवनस्य। भुवनस्य यः। यस्पतिः। पतिर् देवम्। देवꣳ सवितारम्। सवितारमभिमातिषाहम्। अभिमातिषाहमित्यभि-माति—साहम्॥ इमय्यँज्ञम्। यज्ञमश्विना। अश्विनोभा। उभा बृहस्पतिः। बृहस्पतिर् देवाः। देवाः पान्तु। पान्तु यजमानम्। यजमानम् न्यर्थात्। न्यर्थादिति नि—अर्थात्॥ उरुव्यचा नः। उरुव्यचा इत्युरु—व्यचाः। नो महिषः। महिषः शर्म। शर्म यꣳसत्। यꣳसदस्मिन्न्। अस्मि-न्हवे। हवे पुरुहूतः। पुरुहूतः पुरुक्षु। पुरुहूत इति पुरु—हूतः। पुरुक्ष्विति पुरुक्षु॥ स नः। नः प्रजायै। प्रजायै हर्यश्व। प्रजाया इति प्र—जायै। हर्यश्व मृडय। हर्यश्वेति हरि—अश्व। मृडयेन्द्र। इन्द्र मा। मा नः। ॥ [३१] ॥ नो रीरिषः। रीरिषो मा। मा परा। परा दाः। दा इति दाः॥ ये नः। नः सपत्नाः। सपत्ना अप। अप ते। ते भवन्तु। भवन्त्विन्द्राग्निभ्याम्। इन्द्राग्निभ्या-मव। इन्द्राग्निभ्यामितीन्द्राग्नि—भ्याम्। अव बाधामहे। बाधामहे तान्। तानिति तान्॥ वसवो रुद्राः। रुद्रा आदित्याः। आदित्या उपरिस्पृशम्। उपरिस्पृशम् मा। उपरिस्पृशमित्युपरि—स्पृशम्। मोग्रम्। उग्रम् चेत्तारम्। चेत्तारमधिराजम्। अधिराजमक्रन्न्। अधिराजमित्यधि—

राजम्। अक्रन्नित्यक्रन्न्॥ अर्वाञ्चमिन्द्रम्। इन्द्रममुतः। अमुतो हवामहे। हवामहे यः। यो गोजित्। गोजिद् धनजित्। गोजिदिति गो—जित्। धनजिदश्वजित्। धनजिदिति धन—जित्। अश्वजिद् यः। अश्वजिदित्यश्व—जित्। य इति यः॥ इमम् नः। नो यज्ञम्। यज्ञव्विँहवे। विहवे जुषस्व। विहव इति वि—हवे। जुषस्वास्य। अस्य कुर्मः। कुर्मो हरिवः। हरिवो मेदिनम्। हरिव इति हरि—वः। मेदिनम् त्वा। त्वेति त्वा॥ ॥ [३२] ॥

(वनिषन्त पुरस्तान् मा त्रिचत्वारिꣳशच्च) ॥ १४ ॥

---

अग्नेर् मन्वे। मन्वे प्रथमस्य। प्रथमस्य प्रचेतसः। प्रचेतसो यम्। प्रचेतस इति प्र—चेतसः। यम् पाञ्चजन्यम्। पाञ्चजन्यम् बहवः। पाञ्चजन्यमिति पाञ्च—जन्यम्। बहवः समिन्धते। समिन्धत इति सम्—इन्धते॥ विश्वस्याव्विँशि। विशि प्रविविशिवाꣳसम्। प्रविविशिवाꣳसमीमहे। प्रविविशिवाꣳसमिति प्र—विविशिवाꣳसम्। ईमहे सः। स नः। नो मुञ्चतु। मुञ्चत्वꣳहसः। अꣳहस इत्यꣳहसः॥ यस्येदम्। इदम् प्राणत्। प्राणन्निमिषत्। प्राणदिति प्र—अनत्। निमिषद् यत्। निमिषदिति नि—मिषत्। यदेजति। एजति यस्य। यस्य जातम्। जातम् जनमानम्। जनमानम् च। च केवलम्। केवलमिति केवलम्॥ स्तौम्यग्निम्। अग्निम् नाथितः। नाथितो जोहवीमि। जोहवीमि सः। स नः। नो मुञ्चतु। मुञ्चत्वꣳहसः। अꣳहस इत्यꣳहसः॥ इन्द्रस्य मन्ये। मन्ये प्रथमस्य। प्रथमस्य प्रचेतसः। प्रचेतसो वृत्रघ्नः। प्रचेतस इति प्र—चेतसः। वृत्रघ्नः स्तोमाः। वृत्रघ्न इति वृत्र—घ्नः। स्तोमा उप। उप माम्। मामुपागुः। उपागुरित्युप—आगुः। यो दाशुषः। दाशुषः सुकृतः। सुकृतो हवम्। सुकृत इति सु—कृतः। हवमुप। उप गन्ता। गन्ता सः। ॥ [३३] ॥ स नः। नो मुञ्चतु। मुञ्चत्वꣳहसः। अꣳहस इत्यꣳहसः॥ यः संग्रामम्। सङ्ग्रामम् नयति। सङ्ग्राममिति सम्—ग्रामम्। नयति सम्। सव्ँवशी। वशी युधे। युधे यः। यः पुष्टानि। पुष्टानि सꣳसृजति। सꣳसृजति त्रयाणि। सꣳसृजतीति सम्—सृजति। त्रयाणीति त्रयाणि॥ स्तौमीन्द्रम्। इन्द्रम् नाथितः। नाथितो जोहवीमि। जोहवीमि सः। स नः। नो मुञ्चतु। मुञ्चत्वꣳहसः। अꣳहस इत्यꣳहसः॥ मन्वे वाम्। वाम् मित्रावरुणा। मित्रावरुणा तस्य। मित्रावरुणेति मित्रा—वरुणा। तस्य वित्तम्। वित्तꣳ सत्यौजसा।

सत्यौजसा दृꣳहणा। सत्यौजसेति सत्य—ओजसा। दृꣳहणा यम्। यम् नुदेथे। नुदेथे इति नुदेथे॥ या राजानम्। राजानꣳ सरथम्। सरथँय्याथः। सरथमिति स—रथम्। याथ उग्रा। उग्रा ता। ता नः। नो मुञ्चतम्। मुञ्चतमागसः। आगस इत्यागसः॥ यो वाम्। वाꣳ रथः। रथ ऋजुरश्मिः। ऋजुरश्मिः सत्यधर्मा। ऋजुरश्मिरित्यृजु—रश्मिः। सत्यधर्मा मिथु। सत्य-धर्मेति सत्य—धर्मा। मिथुश्चरन्तम्। चरन्तमुपयाति। उपयाति दूषयन्न्। उपयातीत्युप—याति। दूषयन्निति दूषयन्न्॥ स्तौमि मित्रावरुणा। ॥ [३४] ॥ मित्रावरुणा नाथितः। मित्रा-वरुणेति मित्रा—वरुणा। नाथितो जोहवीमि। जोहवीमि तौ। तौ नः। नो मुञ्चतम्। मुञ्चतमा-गसः। आगस इत्यागसः॥ वायोः सवितुः। सवितुर् विदथानि। विदथानि मन्महे। मन्महे यौ। यावात्मन्वत्। आत्मन्वद् बिभृतः। आत्मन्वदित्यात्मन्न्—वत्। बिभृतो यौ। यौ च। च रख्षतः। रख्षत इति रख्षतः॥ यौ विश्वस्य। विश्वस्य परिभू। परिभू बभूवतुः। परिभू इति परि—भू। बभूवतुस्तौ। तौ नः। नो मुञ्चतम्। मुञ्चतमागसः। आगस इत्यागसः॥ उप श्रेष्ठाः। श्रेष्ठा नः। न आशिषः। आशिषो देवयोः। आशिष इत्या—शिषः। देवयोर् धर्मे। धर्मे अस्थिरन्न्। अस्थिरन्नित्यस्थिरन्न्॥ स्तौमि वायुम्। वायुꣳ सवितारम्। सवितारम् नाथितः। नाथितो जोहवीमि। जोहवीमि तौ। तौ नः। नो मुञ्चतम्। मुञ्चतमागसः। आगस इत्यागसः॥ रथीतमौ रथीनाम्। रथीतमाविति रथि—तमौ। रथीनामह्वे। अह्व ऊतये। ऊतये शुभम्। शुभम् गमिष्ठौ। गमिष्ठौ सुयमेभिः। सुयमेभिरश्वैः। सुयमेभिरिति सु—यमेभिः। अश्वैरित्यश्वैः॥ ययोर् वाम्। ॥ [३५] ॥ वाम् देवौ। देवौ देवेषु। देवेष्वनिशितम्। अनिशितमोजः। अनिशितमि-त्यनि—शितम्। ओजस्तौ। तौ नः। नो मुञ्चतम्। मुञ्चतमागसः। आगस इत्यागसः॥ यद्-यातम्। अयातँव्वहतुम्। वहतुꣳ सूर्यायाः। सूर्यायास्त्रिचक्रेण। त्रिचक्रेण सꣳसदम्। त्रिचक्रे-णेति त्रि—चक्रेण। सꣳसदमिच्छमानौ। सꣳसदमिति सम्—सदम्। इच्छमानाविवतीच्छमानौ॥ स्तौमि देवौ। देवावश्विनौ। अश्विनौ नाथितः। नाथितो जोहवीमि। जोहवीमि तौ। तौ नः। नो मुञ्चतम्। मुञ्चतमागसः। आगस इत्यागसः॥ मरुताम् मन्वे। मन्वे अधि। अधि नः। नो ब्रुवन्तु। ब्रुवन्तु प्र। प्रेमाम्। इमाँव्वाचम्। वाचँव्विश्वाम्। विश्वामवन्तु। अवन्तु विश्वे। विश्व इति विश्वे॥ आशूनहुवे। हुवे सुयमान्। सुयमानूतये। सुयमानिति सु—यमान्। ऊतये ते। ते

नः। नो मुञ्चन्तु। मुञ्चत्वेनसः। एनस इत्येनसः॥ तिग्ममायुधम्। आयुधव्वीडितम्। वीडितꣳ सहस्वत्। सहस्वद् दिव्यम्। दिव्यꣳ शर्द्धः। शर्द्धः पृतनासु। ॥ [३६] ॥ पृतनासु जिष्णु। जिष्ण्विति जिष्णु॥ स्तौमि देवान्। देवान् मरुतः। मरुतो नाथितः। नाथितो जोहवीमि। जोह-वीमि ते। ते नः। नो मुञ्चन्तु। मुञ्चन्त्वेनसः। एनस इत्येनसः। देवानाम् मन्वे। मन्वे अधि। अधि नः। नो ब्रुवन्तु। ब्रुवन्तु प्र। प्रेमाम्। इमाँव्वाचम्। वाचव्विश्वाम्। विश्वामवन्तु। अवन्तु विश्वे। विश्व इति विश्वे॥ आशून्हुवे। हुवे सुयमान्। सुयमानूतये। सुयमानिति सु—यमान्। ऊतये ते। ते नः। नो मुञ्चन्तु। मुञ्चन्त्वेनसः। एनस इत्येनसः॥ यदिदम्। इदम् मा। माऽभिशोचति। अभिशोचति पौरुषेयेण। अभिशोचतीत्यभि—शोचति। पौरुषेयेण दैव्येन। दैव्येनेति दैव्येन॥ स्तौमि विश्वान्। विश्वान् देवान्। देवान् नाथितः। नाथितो जोहवीमि। जोहवीमि ते। ते नः। नो मुञ्चन्तु। मुञ्चन्त्वेनसः। एनस इत्येनसः। अनु नः। नोऽद्य। अद्यानुमतिः। अनुमतिरनु। अनुमतिरित्यनु—मतिः। अन्वित्। ॥ [३७] ॥ इदनुमते। अनुमते त्वम्। अनुमत इत्यनु—मते। त्वव्वैँश्वानरः। वैश्वानरो नः। न ऊत्या। ऊत्या पृष्टः। पृष्टो दिवि। दिवीति दिवि॥ ये अप्रथेताम्। ये इति ये। अप्रथेताममितेभिः। अमितेभिरोजोभिः। ओजोभिर् ये। ओजोभिरि-त्योजः—भिः। ये प्रतिष्ठे। ये इति ये। प्रतिष्ठे अभवताम्। प्रतिष्ठे इति प्रति—स्थे। अभवता-व्वँसूनाम्। वसूनामिति वसूनाम्॥ स्तौमि द्यावापृथिवी। द्यावापृथिवी नाथितः। द्यावापृथिवी इति द्यावा—पृथिवी। नाथितो जोहविमी। जोहवीमि ते। ते नः। ते इति ते। नो मुञ्चतम्। मुञ्चतमꣳहसः। अꣳहस इत्यꣳहसः॥ उर्वी रोदसी। उर्वी इत्युर्वी। रोदसी वरिवः। रोदसी इति रोदसी। वरिवः कृणोतम्। कृणोतम् क्षेत्रस्य। क्षेत्रस्य पत्नी। पत्नी अधि। पत्नी इति पत्नी। अधि नः। नो ब्रूयातम्। ब्रूयातमिति ब्रूयातम्॥ स्तौमि द्यावापृथिवी। द्यावापृथिवी नाथितः। द्यावापृथिवी इति द्यावा—पृथिवी। नाथितो जोहवीमि। जोहवीमि ते। ते नः। ते इति ते। नो मुञ्चतम्। मुञ्चतमꣳहसः। अꣳहस इत्यꣳहसः॥ यत् ते। ते वयम्। वयम् पुरुषत्रा। पुरुषत्रा यविष्ठ। पुरुषत्रेति पुरुष—त्रा। यविष्ठाविद्वाꣳसः। अविद्वाꣳसश्चकृम। चकृमा कत्। कच् चन। चनाऽऽगः। ॥ [३८] ॥ आग इत्यागः॥ कृधी सु। स्वस्मान्। अस्माꣳ अदितेः। अदितेरनागाः। अनागा वि। व्येनाꣳसि। एनाꣳसि शिश्रथः। शिश्रथो विष्वक्। विष्वगग्ने। अग्ने

इत्यग्ने॥ यथा ह। ह तत्। तद् वसवः। वसवो गौर्यम्। गौर्यम् चित्। चित् पदि। पदिषिताम्।
सितामममुञ्चत। अमुञ्चता यजत्राः। यजत्रा इति यजत्राः॥ एवा त्वम्। त्वमस्मत्। अस्मत् प्र।
प्र मुञ्च। मुञ्चा वि। व्यꣳहः। अꣳहः प्र। प्रातारि। अतार्यग्ने। अग्ने प्रतराम्। प्रतराम् नः।
प्रतरामिति प्र—तराम्। न आयुः। आयुरित्यायुः॥ ॥ [३९] ॥

(गन्ता दूषयन्थ् स्तौमि ययोः शद्धोऽ नुमतिरनु चन चतुस्त्रिꣳशच्च) ॥ १५ ॥

॥ हरिः ॐ ॥

चतुर्थकाण्डे सप्तमः प्रश्नः — क्रम पाठः — समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १५ | ३९ |

ॐ